# देववाणी छन्दः मन्दाक्रान्ता

**आचार्य महावीरप्रसाद शर्मा**

भाषा भूषा निगमपदवीमाश्रिता ब्रह्मविद्या,
वेद्याऽच्छेद्या विविध पदगा संहता स्फोटरूपा।
सिन्धुर्विन्दौ करतलगतं विश्वभाभासयन्ती,
राष्ट्री धात्री विबुधमुखगा ब्रह्मसूर्देववाणी॥1।।

आद्याऽनन्ता निखिलवचसां धारयित्री धरित्री,
विद्याऽविद्या सकलवरदा तामसं हारयन्ती।
लक्ष्याऽलक्ष्या प्रकृतिपरमा कामिनी कामरूपा,
एका नैका जगति वितता देवता देववाणी॥2।।

सौम्यऽसौम्या प्रखरपदगा वैखरी वैजयन्ती,
नव्या प्राच्या चिरयुवतिका चेतना विश्वरूपा।
रम्या गम्या भव भय तमोहारिणी संगतार्था
भावोद्गात्री मधुरमधुरा चिन्मयी देववाणी॥
पापं वापं हृदयजड़तां नाशयन्ती निराशाम्,
छन्दोदीप्ता सुरसलहरी कर्ण पेया मनोज्ञा।
आर्या घार्या स्वर निचयगा मध्यमा मादयन्ती,
गेयाऽगेया मननसुफला राष्ट्रिया देववाणी॥3।।

मञ्जूषैषा सकलसुभगा रत्नगर्भा पदानां
सन्धिं प्राप्ता त्यजतिनितरां विग्रहं चेत्समस्ता।
दुष्टान् शब्दान् प्रजहति जनास्तद्धितं धारयन्ती,
शुद्धा, गौणी, बहुलमुदिता संस्कृता देववाणी॥4।।

*विद्यावाचस्पति*
*करनाल (हरियाणा)*